५६ मनोरमा २४०३ क्रम

जगन्नाथ

४५ पत्र

अ १

दित्यादिनाशंख्यावद्भिरूपहसनीयमर्थं निरूपयताम्॥ तथा हृद इति स्वगतकौशलमेवाविष्कृतानाना
मेव शब्दानामर्थोपख्यापकत्वं न प्रकारान्तरेणाह्लादनानामपि तदर्थस्य निर्णयेन विलक्षणोऽस्य मु
निपाटवमुद्भिरताम्॥ भवतेऽ इति स्वगत मनोरमायां सा वैधात्लकीयकर्त्रर्थेनानपेक्षस्य भुवस्से
देः प्रवर्तनेन न कृतार्थस्य ह्निपाः शिक्षस्य प्रामर्थ्यमालेख्यश पः प्रहन्निं समर्थयमानानां गुरुदेषह
बिनमतीनां यद्यपि सुकृत्यास्त्वेणापि न शक्यं तेगणाधितं प्रमाणाभावात्तथापि दिङ्मात्रेणाकानवि
कुशाग्रीयाधियोत्तोषु निरूप्यामः॥ हृद्वंतमम॥ अत्रेदम्बधेयम्॥ हृद्वावंसि रियमतिमनामयु तमाय
केवापाणिनीयस्त्वन्यामविकृत्वा ह्रोरंबाधा॥ कथं नत्वेनुपपत्तिपरिहारः इति चेत॥ इस्म
। हलितिकेहस्त्वेऽन्त्यमितिवापरम्॥ नु हितीयस्त्वे मकारात्परतो लङ्मिनुं जनं संयोगान्तलोप
न लुप्यतो प्रदेशोऽददितिवानुवर्तने मिनोपदेशोतो लहत्स्यादिति वाक्यार्थेना लादिलकारस्य
धारोपेन हलसर्वा नलकाराणे नाथा मन्याह अन्याहोयमिति दोहलिबितिप्रथमस्त्वनवाक्यार्थ

स्तेर

म.खं. धीः। अत्राप्यंत्यमिति देहलीदीपन्यायेनाह्वेति॥ इ उपदेशो ऽ इदिति वानुवर्त्तते। तेन नकाविरहु
२ पपन्निः॥ यद्वा हलंत्यमित्येकं सूत्रं लइति वा परम्॥ तत्र अजनात्मकस्य इति यहलस्य
२ नुस्वस्यानुसंधानेन विषयीकृत न स्यानुस्वारे त्रिभिः पदैः सह कृतयोगेन तेषा गुरुत्वाक्या
र्थं धियः साम्राज्यम्। नहि श्रुतमेव वाक्यार्थं बुद्धिमुत्पादयतीत्यस्ति नियमो भावनोपनीता
दपि तस्माद्युत्पन्नानामर्थं बुद्धेः सर्वसंमतत्वात्। अनुमेवायमगुदित्सु ... कौस्तुभ लिंगना
वसरं व्यंजकमुपपादयिष्यामः॥ अथवा हलिति सूत्रे लकारोनुनासिकः क्रियते तस्मानुना
सिकत्वसामर्थ्यात् न चोपदेशे ननुनासिक इदिति संज्ञा भविष्यति अस्मिन्नेव हलूचेन
कारान्यत्तो लकारस्य संयोगांत लोपाहाघहलोक मित्यत्रोपदेशाभावादसिद्धत्वान्नेत्संज्ञा॥
अथात्र संयोगांत लोपो ऽस्ते भः। संयोगांतस्य पदस्याभावादिति चेन्न। संयोगांतस्य पदांत एप
य [illegible] लोपइति पदस्याधितन्त्रत्वात् संयोगसंज्ञानाव्ययवाना २

वामामिति मुख्ये पदे संयोगेन पदस्याविशेषणोत्तग्रहस्य वैयर्थ्यापत्तेः। अलिलिसि चीष्टरू इत्यत्र विम
क्ति सकारोन्तं डग्लिष्टस्य सकारस्य लोपापायास्येवा अयमणीयत्वात्।। कर्मवत्कर्तृगत मनोरमा
यां स्थानिवत्सूत्रगतकौस्तुभे च पदे लोपस्यापि स्वयमेवाश्रितत्वाच्च।। सरूपसूत्रे च न्यूसस्त्वइ
४ लो त्यत्र संयोगान्तलोपस्यैव भाष्यकृतोक्तत्वात्।। तत्र त्यकैयटग्रन्ता हलस्यादित्विलोपश्चापोत्तरस्य नु४
सिद्धत्वोक्तेन पक्षकृत्याक्षेपेण विरुद्धाच्च।। तस्माद्धलङ्घ्याब्भ्य इत्यत्र हल्ङ्यादिलोपस्यस्तुतिस्याद्वि
षांश्रकृतिं हलन्तत्वेन विशेषितामाश्रित्य तत्लुक्पदगतसंयोगमाश्रयतः संयोगादिलोपस्यचाच्र
हतौ भाष्ये संयोगान्तलोपो यथाश्रुतस्य रमतीर्था ग्न स्त्वसहश्चमस इत्यत्र संयोगादिलोपोप्यप
मेवा। प्रत्येकं संयोगसंज्ञापक्षे संयोगादिरिति वृश्च ब्रीहि कुर्मधात्यान्यत रस्याश्रयणात्।। स
ड. ग्रहणापक्षेपि तव्यक्तिपक्षकृतिगतत्वेन संयोगस्य विशेषणाइत्कोदाहूर्णायोः संयोगा
दिलोपश्च सकेमोपहचा। एवं स्थिते स्कोरिति सूत्रे शवनास्तीति भाष्यं तु वस्तुकथनार्थसमा

म.खं. २ घ्यंतरवर्णानपरं बोधयम् ॥ नच यणोऽश्रुतिरिति धारंभे फलीलोपविधाने च लस्य संयोगांतलोपो दुर्लभ इति
वाच्यं वहिरंगलक्षणत्वादिति तृतीयपक्षावलंबनेन तस्य सुलभत्वात् ॥ नच पक्षत्रयानुगृहीतस्ये
३ व साधुत्वं नान्यस्येति वाच्यं त्रयाणामपि पक्षाणां इत्येकमितरपनिरपेक्षतयैवाकरसिद्धत्वाद्
रिवेशमपतो पक्षभेदेन रूपभेदस्य स्वयमेव वक्ष्यमाणत्वाद्यो ॥ कर्मवत्सूत्रगतमनोरमाकोस्तुभ
योर्लकारस्य स्वयं संयोगांतलोपोक्तेश्च । एतेन लकारस्य संयोगांतलोपो दुर्लभ -- मनोरमाग
ता ॥ -- एसे -- । एवंस्थिते सहविवक्षाविरहाद्द्वौ नुपपत्तिः सिद्धासिद्धयोर्युगपदसत्त्वादनुपप
त्त्या बोधक्लेशश्चेत्यादिदोषाभासानां परिहारार्थमायासोऽपि नावश्यक इति सर्वं वेद्वस्यमा ॥ यद्वव
लघयोगोऽपि दुर्लभ इत्युक्तम् ॥ नन्वाक्रान्ते भूरित्यत्र भवति संदेहः अस्ति । समीपे नेनतरवेति षष्ठी
स्थाने ऽतिसूत्रगते नैयर्त्यं न नरयोगे षष्ठीस्तुरान पर इति सूत्रगतेन चभाष्यग्रंथेन सह वि एप ३
रोधापत्तेः । तथा तत्सूत्रगतेन ... समीपयोगे तस्यापीत्यनेन सामीप्यलक्षणोऽपि संबंधो वगा...

नेत्यनेनचकैयटग्रं छेनसह विरोधापत्तेश्च। आद्योक्ताऽर्णोपदेश इति। यत्तु यद्यपि उपदिश्यतेऽने
नेतिकरणे सूत्रस्याशास्त्रमुपदेश इति भाष्यवृत्त्यादिबुध्यिनं न घापितत्प्रौढिवादमात्रं। करणे
घञो दुर्लभत्वात् ल्युटा बाधादिति। तदसत्। अंततः स्वरेणासिद्धत्वोपपुष्टत्वात् इत्यवदीर्घस्येवोप
देश इत्यत्र करणे घञो भाष्यकारवचनादपि सिद्धत्वात्। अहो महानयमनयो ऽपदस्फुटगुणा
तात्पर्यमादाय दीर्घे निर्देशस्य साधुत्वमभ्युपेयते स्फुटोपलभ्यमाने मुख्ये तात्पर्ये सत्यपिक
रणाधत्नुरूः प्रौढिवादत्वमा॥ स्वत्रविरुद्धस्यापि त्वैंपि तत्कादेर्भाष्यकारवचनात्तु गृहीतस्य प
थोत्तरमित्यादिना भवता स्तु[illegible] शब्दताधायअभ्युपगमाद्वा। अपि चैवं सति प्रियाख्येन शब्दस्य श
साधौ स्तुत्वेन णत्वं भवताहूषितमसंगतं स्यात्॥ एवं पि स्तुत्वसिद्ध्यर्थमेव मूर्द्धन्यानुवृत्तिमुपेत्य स्व
ति पदैकं णत्वं सर्वैकृतमिति तदाशयं वर्णयता स्तुत्ववादिनापि मूर्द्धन्यानुवृत्तिपरायाभाष्य
कारोक्तेः प्रौढिवादतायावदूंशक्यत्वात॥ इत्थं तु तत्पुरुषमध्ये च प्रौढिवादत्वकथनं स्तुत्वानुगु

छेता२ तउ
ण्वं५

मखं॰ ४ णांसूत्रन्यासविरुद्धत्वात्॥ न तु करणाद्ध्युच्चने॥ तस्य सूत्रानुसारित्वात्॥ तत्तु बाहुलकतात्प
र्यज्ञैर्भाष्यकारैरेवस्फुटीकृतं॥ एवं स्थिते यदि यथोत्तरं मुनित्रयस्य प्रामाण्यमिति निरीक्ष्यते
4 तदा भाष्यकारवचनाविशेषान्मूर्द्धन्यानुदात्तवि गिर इव करणाद्यूर्जगिरो विद्यामासुपसुचिंताव
स्तुतस्तु प्रियाष्टनिणत्वमशुद्धमिति गीरेवाशुद्धा तथाहि॥ यथोद्देशपक्षे रषाभ्यामिति सूत्रग
ते तस्य दोषइतिवार्त्तिकस्थचणावचने सत्यमतिवानडुमयगतेन स्मिन्निपाष्टनिणत्वं सिद्धनि
॥ स्थिते तु सूत्रगतेण वचनेवार्त्तिकस्थणवचनं कृत्याख्यानपक्षोक्त्या नपराह्णएरा सूत्रस्थण
वचनस्य वार्त्तिकस्थणवचनानंतनैरश्रियाष्टनिणी यद्वेप्रयोजनहेतुत्वात्॥ कार्यकालप
क्षे सूत्रस्थणवचनं कृत्याख्यानविशिष्टवार्त्तिकगतणवचनाकृत्याख्यानपक्षेवाश्रियाष्टनिणत्वं
न मेहु मीढे इतिप्रपञ्चस्थायां सत्यां भाष्यकारादीनामप्युपजीव्यस्य महर्षेः सूत्रकृतो मूर्द्धन्या नव ण्प
त्वेः प्रतिसंधानमेव नास्तीति नावप्रामाणिकैर्वक्तुमशक्यं प्रत्युत सूत्रकारानुरक्तैर्णत्वविधानमा ४

णत्वनि ४

मर्थ्यां स्त्रियाष्टनि णत्वस्य साधुत्वमेव वार्त्तं भाष्यकारानुरक्तैश्च यथोत्तरमित्यादिकां वाचमाच

ष्टाणत्वस्य साधुत्वं उपेन्द्रणीयश्चोत्सर्गसिद्धो विकल्पमेवेदं इत्याख्यानात्संभवतीति त्यमन्याय्या

दस्मादुभयस्मात्सर्वविधावित्यत्र पंचमीसमासस्य काचित्कतया शङ्कितस्यानिवर्त्तनाय भूत्वा

तस्य दोषइत्यत्यत्र णत्वग्रहणाश्त्याख्यानाश्रयणाद्धा स्त्रियाष्टनि णत्वं भाष्यकृतोपि संमत

मिति कल्प्यनैवोचिता॥ एवं स्थितेपि तिपदोक्तणत्वकल्पो पापोत्थापनाद्धारा स्त्रियाष्टनि णत्वे

निर्णीत एव पंचमीसमासानाश्रयणात्तस्य दोषइत्यत्र णत्वग्रहणाश्त्याख्यानाश्रयणं वा मधु ना५

न्नीवनितस्पोपाथी नास्त्येति मत्वा सूत्रकारैर्ग्रविचनं कृतं। एवं सति वार्त्तिकगतणत्वप्र

त्याख्यानमपि तुः शक्यमेवानस्यसूत्रगतणवचनोत्थापितत्वात्॥ भाष्यकारैस्तु प्रवलकृतेन णा

त्ववचनप्रत्याख्यानेनैव प्रकृतेश्रतिपत्तमिनिदुपापाकस्यापिष्यते इति मत्वा नत्सम्पाख्यात

मिनत्कृतेन णत्ववचनप्रत्याख्यानेनैव प्रकृते श्रतिपत्तमिनिदुपापाकस्यापिष्यते इति मत्वा

म.रं. ५

५

नैस्वतशत्याख्यानमिति सुनिश्चयश्च निमयोरित्यप्रकारवैलक्षण्यं नतु लक्ष्यवैलक्षण्यमतो न चायं
कृतोपचयावकाश इति सूक्ष्ममाकलनीयं॥ यत्तु तत्र कार्यकालपक्षाश्रयेणांतरंगपरिभाषा
प्रवृत्तस्याणत्वं नेति निरूपितं॥ तदप्यसदेव॥ क्रियाफलनिरपेक्षमात्रफलकात्रो णइति श्रुति पदोक्त
णकारकरणाद्विंगादेवप्रकृतेयथोद्देशपक्षस्याश्रयणीयत्वात्तास्यान्तरंगप्रमाणत्वाद्वायमप
राधीनप्रमाणाप्रमेययोः॥ तस्माद्धत्रविपरीतएवबोधीनमनोरमाकृतामिति सूक्ष्ममीक्षणीयं॥
वाहुलकमगतिकगतिरित्यपप्रसंगतमेवातात्पर्यनिर्णायकहेठप्रमाणाभावएवतस्यागति
कगतित्वात्॥ इह तु भाष्यकारवचनस्यैवतात्पर्यग्राहकत्वात्॥ तस्मात्करणेघञो दुर्लभत्वा
दितिगीरसंगतैवानकानं॥ यत्तु शब्देनस्वोच्चारणाकालीनव्यपतेइत्याहुः॥ तन्न॥ कुसब्दलक्ष
म्यस्वोच्चारणाकालस्यस्यादृष्णादिरूपभेदस्संबंधेनोत्तरपदार्थेनान्वयस्यानुपपत्तेः॥ नामार्थयो राम
र्भेदेनान्वयस्यायोगात्॥ अभेदेनान्वयस्यचासंगतेः॥ नत्वकारादीनामुच्चारणकालः सर्वथैवोका ५

घारणाकालोभवतीत्यस्ति नियमो येन तादृशकालाभिव्यक्तितो लक्षणावाक्यार्थः सकललक्ष्यसा
धारण्यः स्यात्तादृक्कालविशिष्टकं तु कालैक्यं संभवदपि न लक्षणास्य सकललक्ष्यादिसाधारण्यपाधायकं स्यो
चारणाकालसदृशस्योच्चारणायोग्यकालो वा लक्ष्यत इति तद्युक्तं वक्तुं प्रागदृश्यं वमात्रालादिका
लगतधर्मेण बोधात्तस्यापि ॥ यत्तु कस्यचिद्ग्रहणमविवक्षितमस्य चरितस्य ईदृशस्य त्वमित्येव बोध्य ।
तदविवक्षायां वमानं लक्ष्यदर्शनं प्रातिशाख्येष्वेत्याकुल तल्लक्ष्यस्य दर्शनं तावदं साधकं दृश्यमान
लक्ष्यस्य वेदमात्रगतत्वेन तत्र प्रातिशाख्यगतानामुदात्तादीर्घस्यार्थ्य विशिष्टं निर्दिष्टं तिकं पितमिला
दीनां तत्र रक्षात् एवापराणां विशेषवचनानां बाधकतायां सकललोकवेद [illegible] साधारण्यस्य स्वभा
करणास्यत द्विषयातिरिक्तविषयतायाएवकल्पयितुं शक्यत्वात् प्रथ्ये यदताकल्पनस्यानाय
त्वात् तादृत्थं च यत्र विशेषवचनं नास्ति तत्संचयनिश्चितं तत्र लौकिके प्रयोगे ऽसमात्रे वदीर्घ्वत्व तयो
लदात्वे तिबोधयितुं कस्यचिद्ग्रहणं न हि प्रातिशाख्यवचने स्मर्तव्याम्येकवाक्यत्वे वो वितावद्बुनो मं

म.खं.
६
6

धीत्तुकं पयेत्कं पं इत्यादि विवनातु गेधादादि न इत्यस्याप्य विवक्षायां यदपि शान्ति शाब्येवचनं श्रमा
णातयो यन्य स्त एकान्तर समावेश इत्यादि तदपि न साधकं अर्धमात्राई मेव चेति पक्षयोः पा
णिनिकृत सामान्य लक्षणा शाकल्यादिकृत विशेष लक्षणाभ्यां द्वयोरनुवादाद्याघाशरी मध्य
स्थित विस्पार्थः। एते नार्द्धह्रस्व शब्देन अर्द्धमात्रा लक्ष्यते इति हरदत्त ग्रंथस्तु मनोरमा पारतन्त्र्याकथं
चित्ररय इति पठन्ति तदपि प्रयासाहारदत्तोक्तरूपस्य शकुन्तनस्यान्याशयस्यात्ता स्वल्ववर्णयोः। यत्तु आचक्रा
चरी ती नो चे मौ वर्णौ चतुर्थ्यत्वलौसनयोर्वर्णयोरिति चापश्यमां तेन परिनिष्ठितविभक्त्यंतेन वा सम्
मा सरूस्याहुः। तन्न तत्वाविति रूपस्यासिद्धेः। कस्य ककइति शाकल प्रकृतिभावेन तदभावे सवर्णा
दीर्घे णाचूर्धसात् देशस्य बाधात्। न च शाकलप्रकृतिभावपक्षे सवर्णो दीर्घो पर्मकेत्वेका स्यातौ इ
त्यलि गुणो कृते निमित्ताभावात्प्रकृतिभावस्य दीर्घस्य चाप्रायाम्यादेशो निर्बाध एवेति वाच्यं। एम
अत्र पारिमितिनिर्णीतसपालाप्याति वच्चावेन प्रकृतिभाव निमित्तस्य जागरूकनयान दपृहत्तेरयो

गात्॥ न च प्रकृतिभावः पदान्तविधिः। विकाराभावमात्रपर्यवसन्नस्य तु वादेवलोपस्येव पदचरमा
वयवत्वाभावात्। भावसाधनस्यैव विधित्वे शब्दस्य न पदान्तस्य स्वेष्टक्रियाकानुरोधेनाकरोपसिद्धान्तितत्वा
त्॥ इत्थं च प्रकृतिभावप्रसङ्गे [illegible] अग्नीलाविति वरूपे न च प्रकृतिभावाभावप्रसङ्गेतं गत्वा त्रयशंस
वर्णादीर्घं बाधित्वा वार्णादाङ्गं बलीय इति पृथग्गणसोऽध्याहृतेति मित्रविरुद्धात्पु वर्णादीर्घो प्रसक्तौ य
णो वत्याणु इति वाच्यः। समानाश्रय एव वार्णादाङ्गस्य बलीयस्त्वात् तारारोऽक्कते न स्यान्निवर्तनात्
वर्णादीर्घस्य प्रवृत्तेरौविन्द्याद्वा। न च दीर्घविधौ स्थानिवङ्घरति पृष्टः शंक्यः स्वरदीर्घयलोपेषु लोपा
जादेशस्यैव स्थानिवत्त्वनिषेधात्। एवं पदान्तविधौ न स्थानिवदिति निषेधोऽपि नात्र प्रवर्तते। सवर्ण
दीर्घस्य पदचरमावयवत्वविशिष्टस्यानिष्पत्तेः। न च ग्र त्वर्णयोः परत्वान्नादादेशस्य दीर्घ
स्य पदत्वं अपदेऽपि वङ्घा वाचरमावयवत्वं चेति वाच्यं। अन्नादेशस्य वनामसस्थानेऽपरपदसंज्ञामा
मात्रस्य भाष्यकारमते निषिध्यमानयायाम्भवानाक्रियते रहितवचना [illegible] त्र वं भागस्य पदत्वाभि

का १

मदं. ७ 7 ङेः। असर्वनामस्थाने यचीति निषेधेन साहानिकृस्वंनत्वम् अयुक्तपदतायाश्चातिदेशिस्वंनत्व
प्रयुक्तपदतायाअपिविनिहद्वेः। नचोत्तरपदत्वेसापदादिविधाविति वचनारंभपक्षे सर्वनामस्था
नेपरेपदसंज्ञाविधिरिति षेधयोरभावात् सवर्णदीर्घस्य प्राप्तकृदिशाख्या देवपदांतत्वमितिवा
च्यं। उच्छ्रुतु उच्छ्रुऊँम्मवदित्यत्र पक्षे शाकलप्रकृतिभावस्य सर्वनामस्थाने पदसंज्ञानिषेधं विनाऽ
वारत्वेन भाष्यकारीयकल्पनाया एवाश्रयणीयत्वात्। ऊशब्दस्य [illegible]पूर्वपदादेशत्वेन प्राप्त
याः पदतायाः अन्तरपदत्वे चापदादिविधाविति वचनारंभेण निवारणात्। यदि तु पूर्वस्यैव विधौ
स्थानिवद्भावोनतुस्वपूर्वैकोशविधाविति निरी[illegible]तेन दाधिगुणापेक्षयांतरंगत्वेन पवर्ग
दीर्घएव वज्रवानितिप्रायरूद्रघणानास्यैवनिष्ठा। एवं नपौ[illegible]त्वापि तेस्कृपसंगतमेवा
शाकलप्रकृतिभावेन सवर्णदीर्घणाव्यरकारस्थाने यणादेशस्य बाधात्। ननु शाकरंपरत्वे
निसत्वंचाऽक्षिसपरस्य यणादेशे कृते प्रकृतिभावदीर्घयोरप्रसक्तौ तस्य स्थानिवद्भावात्

दे ५ ष्य ४ शा ३

वेयर्णादेशो निर्बाधः। न च स्थानिवद्भावादेव नूयोः आमिरिति वाच्यं।। सवर्णात् दीर्घस्य पूर्वमात्रविधि
त्वाभावेन तस्मिन्कर्तव्ये स्थानिवद्भावानुपपत्तेर्लृकृत्वात्।। ऋकृति भावस्य च पाक्षिकतया पक्षे घ
ऌत्वभावस्य सिद्धेः। न चांतरंगत्वात्सवर्णदीर्घ इह त्रिः प्रथमेङ्वीरिति वाच्यं।। नाजानंतर्य इति नि
षेधस्य जागरूकत्वादिति चेत्।। मैवं। असिद्धं बहिरंगमंतरंगे इति परिभाषाया नाजानंतर्य इति
निषेधेन निर्देशिनेत्वं तरंगं वलीय इति परिभाषायाः इत्यचः परस्मिन्निति सूत्रगत कौस्तुभे म वनं व्य १५
वस्थापितेन सवर्णदीर्घस्य वलस्यानृतेः। अत एवाचः परस्मिन्निति सूत्रे [redacted] नित्यपरयणादेशाप
रत्वाहीध्यवस्थया। युगपत्संभवो नास्ति बहिरंगेण सिध्यतीति भाष्यकृतोक्तं संगच्छते।। यदि वावि
वर्णाकारोकारीत्या षत्वतुकोरसिद्ध इत्यत्र नाजानंतर्य इति परिभाषा न लाघ्यते किंतु बहिरंगपरिभा
षायाश्च नित्यत्वमित्युच्यते एवमपि प्रमाणसिद्धप्रयोगनिष्पत्त्यर्थं तत्स्वीक्रियते न तु प्रामाणिक
प्रयोगासिध्यर्थमिति यत्किंचिदेतत्।। तस्मात्ऋकृति भावाभावपक्षे गौरिति रूपमुचितमात्र आणहि

म॰वं॰ ८ ४

दित्सवर्णस्याथेत्तु इत्याहारग्रहणेषु तद्वाच्यवाच्येति रूढलक्षणोन्यमुमर्थमेतत्स्वगते कौस्तुभेष्वप

वर्णाचक्रुः। तथाहि अकः सवर्णे दीर्घ इत्यात्र सवर्क इत्याहारान्तरीय कारास्तयः कथंग्राह्याः। नहि

तद्वाचकः शब्द इत्यस्मिन्सूत्रे उपात्तोस्ति। अकुशब्देनाकारादयोप्युपस्थिता इति चेत्। नहि वाक्या

र्थेनैवं पदार्थसंसर्गस्य वाक्यार्थत्वाच्च तत्तेषां पदार्थोपस्थापका इति अतुक्षारितत्वात्। अत

एव अणुदितेत्यत्र शब्दविशेषणं वेत्यर्थे नतु नदर्थवेत्यादि। तत्रानुच्चारितत्वाद्गणादिसंज्ञा

प्रतीताइकारादयः स्वसंज्ञिनामीकारादीनां नोपस्थापका इत्यं शास्त्रावदसंगत एवात्रार्थोपस्थि

तौ वाचकतावच्छेदकरूपेण वाचकज्ञानसामान्यस्यैव तन्त्रत्वात्। अन्यथा रहसि मोनसुक्काजि

तवदनस्य पुस्तकमीक्षमाणस्य ग्रंथार्थशाब्दबोधानापत्तेः। शाब्दबोधकारणतावच्छेदककोटौ

वुच्चारितत्व विशेषगौरवाच्च। नापि शक्त्युपस्थितस्य शब्दस्य न बोधकत्वं लिप्याद्युपस्थितस्य तु बोधक एव

त्वमित्यपि रहस्यमात्रास्ति। पदस्मात एव अणुदितेत्यादावर्थवतीति वोधीनेत्युक्तान्तरस्यासंगतं। ८

त्वर् वं१

अग्नित्वादिविशिष्टार्थशक्ततावच्छेदकानुपूर्व्यज्ञानादग्नित्वादिनार्थत्वविशिष्टार्थशक्ततावच्छेद
कानुपूर्व्यज्ञानादर्थत्वादिनारूपेणार्थस्य वेदनकर्मतयाबोधापत्तेरनुपपत्तेः।ननु कैयटोक्तरीत्या
यत्नप्रकरणादिवशाद्धितिष्ठ्यतेनिवेशाद्युग्मीलद्व्यादिरूपाज्ञगृक्रुशब्देनप्रतीयते तत्रार्थविशे
तिबोधश्चापाद्यत इति चेत्।एवमप्यर्थत्वविशिष्टस्य कार्यकर्मकवेदनविषयकबोधापादनमप्य
क्रमेवार्थत्वविशिष्टवाचकस्यतदुत्तरकर्मताबोधकविभक्त्यभावात्।अग्नकुशब्दाद्वितीयात्वा ती५
त्वत्ववीविशेषावच्छिन्नायायाश्च एवंकर्म ताबोधविलम्बेनार्थस्य।तस्य तत्कुशब्दार्थत्वाभा
वात्।ननु अर्थपदस्मीदृशादिरूपार्थविशेषपरमिति चेदेवमपि तद्वाचकोत्तरकर्मविभक्तिज्ञानस्य वि
रहात्।तत्कर्मकवेदनबोधापादनस्यासंगतत्वात्।वक्ष्यमाणेन हेतुनाऽग्निकर्मकवह्निविशेषस्य पा३
स्य कर्मताद्वारा मतिवेदनादयबोधे निराकांक्षत्वान्नार्थस्य कर्मता संसर्गेण।वृषबोधस्यासम्मतेः।
अयं कथं प्रत्याहारग्रहणे सवर्णग्रहणमनुपदेशात्।अङ्कुस्वसंप्रत्यया यादि निर्देश्या यमाण। संघ्नत्ता

वप द्धर

मवे॰ यकत्वाच्छक्यस्या वचनमितिवार्त्तिककृतामुक्तिः संगच्छत इति चेन्न। इत्थं। देवदत्तादिशद्वानां बो
९ तेदारत्वावच्छिन्नगृहीतसंकेतस्य पुंसो देवदत्तः शोभन इत्यस्माद्वाक्यात् टशब्द एव शोभोद्देश्यु
७ तयाभासते। तद्बोधकदेवदत्तपदे तदुद्देश्यतानुयुगायोर्योगपि विभक्त्यंतत्वविशेष्यबोधशब्द इयोंद्धूरेत २
घंजितयोस्सत्वात्। नतु घटशब्दोपस्थितोपि घटः तद्बोधकघटपदे तयोरसंभवात्। यथा दे
वदत्तं जानातीत्यस्माद्वाक्याद्घटशब्दं जानाति कर्मतयान्वयस्य। उभयत्रापि हेतोरुक्तेः। तद्बोधक
घटपदोत्तरं कर्मत्वबोधकविभक्तेरभावात्। एवमिहाप्यकःसवर्णे दीर्घ इति वाक्यार्थद्वीबो
द्देश्यतारूपस्थानित्वमकृपदबोध्यानामसूत्रसमाप्त्यायगतौ सिकारादीनामेवस्यात्तत्तद्बो
ध्यानामीकारादीनां तदुपस्थापके तादृशोद्देश्यताबोधिकायाः स्थानषष्ठ्या अभावात् स्थान
षष्ठीसुक्ते च तदुपस्थापकताविरहादतः श्रीशाद्यसिद्धिरिति तेषामाशयः। ननु अश्रितानां लप
मर्थोपस्थापकत्वेवनास्तीति। उक्तं हि वयस्यं गाता वार्त्तिकपरस्याख्या वैवं प्रत्याहारेऽवतितम् ९

नाम

नीतिशेषः। सवर्णग्रहणं सवर्णानामीकारादीनामप्यन्वयबोधराहित्यं प्राप्नोतीति शेषः। अत्र तु पदेष्या
त्। सं ध्यनुस्वारणीत। एवं चमगत्वाभावासाध्येतरूपयाप्ते तयासहतेषामसति संकेतपरिच्छेदेषु
त्विताप्रसिद्धिः। ह्रस्वसंप्रत्ययात। ह्रस्वरूपस्थापनात। उच्चार्यमाणासंप्रत्यायकत्वात। उच्चार्यमाण
स्य। नन्वहोधातुकुलयोगपविभक्त्यंतत्वादिनाज्ञानस्य सम्यक् उद्देश्यविधेयभावविवेकेन अन्व
यकत्वादन्वयबोधकत्वात्। उच्चस्यावचनमाहुर्दृष्टान्वयबोधजनकत्वं। एवं चह्रस्वैदीर्घाणामु
पस्थितावपिप्रत्यासर्धीतिभावः। [redacted] अर्थोच्चार्यमाणस्यैव शब्दस्यार्थोपस्थापकत्वं
पकत्वेतिनियमस्यानंगीकारे देवदत्तपद[redacted]स्यैवरमिति द्वितीयैकवचनांतपदस्य हीनमं
केनस्पदेवदत्तंमीतिवाक्याद्द्वकमेकवेदनबोधापत्तेरितिवेद्यं। उच्चारणस्य प्रागेवनिवेदना
त्। प्रकृते त्वगादिसंज्ञानां षष्ठ्यादिविशिष्टकारादेः संकेतग्रहाभावेनैवविधायाश्च प्रयोगा

स्थापया। १

मखे· इवोध एव॥ अगीत्सुरूसंपाठमात्रेणास्पतेइत्ति॥ अध्ययनादिकर्मत्वादि विधेयोद्देश्यतयेति शेष
९ पूरणो न तथाविध शाब्दबोधपरतयैव व्याख्येयं॥ अकृशदेन इकारणादि वशाद्विशिष्टसन्निवेशाच्च
10 क प्रतीयमानापि स्वार्थेन घत्वोपपत्तीति केचित्‌ तोप्येवम्परतयैव व्याख्येयः॥ पुस्तकादिदर्शनस्थले
ना२ तु नालिपिदर्शन प्रतीत नानाविध विमर्दं तत्पदसमूहात्मक वाक्यस्याविकल स्य प्रतीतेर्नानोद्देश्य
कतानाविधेयकशाब्दबुद्धेः साम्राज्यो॥ अत एव तत्र लिपिगतविमर्शाद्यभिव्यंजकानां यथाक्रमादृ
वशाद्वर्णानामुपस्थितो न भवति लिपिविशेषोपि शाब्दधीः॥ भवति च तेषां मूर्द्धनो पस्थितेः॥ एते
न प्रतीयमानस्य प्रस्तावकत्वायोगादिति पूर्वपक्षशङ्किकागतकेयदोषविवरणोक्तदिशा यथाक वि४
र्तव्यमित्येव यदुक्तिः॥ त·प॥ अन्नतकारविशिष्टेयं संज्ञा नत्वर्णमात्र॥ तस्य हि घुमाद्यंतर्गतावा
००: दिहपदैकदेशत्वेनानर्थकत्वात्‌ इहकतापसंगएवनास्तीति निष्कर्षइतिकौस्तुभेनिर्णीतं तात्तद्रप
सन्ता॥ विशिष्टस्य संज्ञात्वे मानाभावात्‌॥ सूत्रे मानमिति चेत्‌॥ तत्र सूत्रस्य तात्पर्यविरहात्‌॥ नु ष्णात्‌ १·

अत्रशोधप त्रमेकम ३

नाऽज्झलौ। आकृतिपदार्थतापक्षेऽणग्रहणस्य सवर्णग्रहणार्थं सूत्रे प्रत्याख्यानाद्दीर्घहलां वसावर्ण्यनिषेध
स्य प्रयोजनं विचारणीयम्। अथास्मिन्नपि पक्षे सौत्रत्वेन वर्णविषयतया यद्यण्ग्रहणं स्यात्तदा नाऽज्झ
लाविति स्य करणीयतापत्त्या गौरवदोषस्तावत्स्फुट एव। एवमप्युपलक्षणत्त्वे मंदोषं यदीदम् अण्ग्रह
णं नाऽज्झलाविति च प्रयोजने तदापि प्रश्लेषनिर्देशोऽनर्थक एव। व्यक्तिपदार्थतायां तु द्वयमप्याव
श्यकम्। तृतीये तु वेलास्वित्यादिना लिङ्गेनापि शक्यते गतार्थयितुम्॥ ढो ढे इति न भवतीति॥
ननु ढलोपाभावस्य प्रयोजनत्वोक्तिरसंगता। असति प्रश्लेषनिर्देशे आकारस्य हल्त्वेन पाशब्दस्य सं
योगसंज्ञायां संयोगान्तलोपं प्रति ढत्वस्यासिद्धतया तदत्र लोपाभावस्य प्रयोजनतायाऽवक्तुमयुक्त
त्वादिति चेत्। संयोगान्तलोपस्यासति प्रश्लेषनिर्देशेऽपि शक्यपरिहारत्वात्। तथा हि। हलोऽनन्त
रा इत्यत्रैकशेषः। अनन्तराश्चानन्तराश्चानन्तराश्चानन्तरा इति। तत्र न विद्यते अन्तरा मध्ये येषां भिन्न
जातीयो वर्ण इत्येकस्यार्थः। न विद्यते अन्तराऽकारो येषामित्यपरस्य। तेनाऽजव्यवहिता आकारा

म॰ खं

१०
10A

नवयवकसमुदायमावमापन्न[redacted]श्चेति लभ्यते। अत्र तश्चपा शब्दस्याकारा[redacted]वयकसमुदायमा[redacted]
वापन्न[redacted]त्वात्सं[redacted]योगस[redacted]ज्ञाया अभावे संयोगान्त लोपः शक्यपरिहारो भवति। एवमस्पप्र
योजनस्यान्यथासिद्धिरपि संभावितेति मत्वाभावः प्रयोजनतयोपन्यस्त इतियादिके नवि
दूरापतितदानदोषः॥ ॥ शोधपत्रमिदं दशमपत्रे प्रथमपङ्क्तौ ज्ञेयम॥ ॥ ॥ ॥

१०ाम

व्याप्तमिमांस्य वार्त्तिककारैस्तपरशब्दस्य प्रधानार्थस्यैकवर्णस्यैव संज्ञात्वे स्त्वजनतापूर्ववर्त्तिनेनाम
दाध्युक्ते। तस्य विशिष्टसंज्ञात्वतात्पर्यस्याप्रामाणिकत्वात्। न हि पित्रापुत्रस्य यैसिद्धत्वं यनिष्ठ
तेनामुक्तं टमावल्लाणोषुं हस्यस्ते षु तद्धं षु तद्वचनमवज्ञानानेत्वं दत्तइति इति नामुक्तं नम
पितृदेवरत्न इति युज्यते मादेति केवं देत्तं। तथा च भाष्ये पयत्राण्यहराणामनुवर्शं तेनततो नियम
मार्थो॥ अथ निवृत्तं तत्र ज्ञापकं। नियमार्थमिति चेद्दीर्घग्रहणे स्वराभिन्नानां ग्रहणं। ज्ञापकमि
ति चेद्ध्रस्वग्रहणे दीर्घप्लुतयनिषेधः॥ विप्रतिषेधात्सिद्धमिति॥ यस्त्वित्रविशिष्टस्य संज्ञात्वे
स्यात्तदा तस्यान राल्वात्स्वर्णाशास्यमावात्रिःयमो किस्संगतास्यात॥ विप्रतिषेधस्यानुपपत्तेः स्या
त्। तस्माद्विशिष्टस्य संज्ञायां बाधकविरहे पि नैतच्छात्रस्य विषयः। तत्का सूत्ले हिं किमर्थं इति चे
त्। अकामादेस्तत्कालसंज्ञात्वेलिंगमिति विग्रहाणा। प्रातिपदिकसंज्ञानोतीत्यादिकसंज्ञात्व
नोतीत्यादिनिर्देशाल्लिंगाद्विशिष्टसंज्ञैव न केवलास्येति विभावनीयं। स्वंरूपं यत्तु स्वंरूपं संज्ञा

म.खं· ११ ॥ संत्रीति। तत्पूर्वापरवाक्यार्थापर्यालोचनान्नाऽऽत्रअणुदित्सवर्णाप्य·नपात्सत्का नस्य·येन विधिस्तदं
[redacted] त स्येत्यादिषु संज्ञासूत्रेषु ग्रथमाना नाना संज्ञा समवेककत्वेन षष्ठं नाना संतिसमर्थके त्वेन र
घका ते॥ तथा च प्रत्ययबोधइति सूत्रे भाष्ये॥ स्वं रूपं शब्दस्य संज्ञा भवतीति। हंते पि संज्ञा भवि
ष्यति। स्वं रूपमिति सूत्रे प्येवं रूपस्य ग्रहणे किमर्थं शब्दस्यार्थे संज्ञेत्येवं रूपं शब्दस्य संज्ञा भवती
ति॥ ॥इति संज्ञाप्रकरणम्॥ ॥ निरवोत्या तां अल्लु शेमु चारी नामित्यादावंत्यस्याचो· संभवादित्याद्यरिना
[redacted] ग्रंथेन प्राचीनप्रक्रियाकृतां चिन्तितं रहस्यं तं॥ तन्न तच्छयानवबोधात्। न हि वत्तावचइति पंचम्यंत क ४
येनोत्पादितिपंचम्यंतेन समानाधिकरणी स्यात्॥ अपि तु सूत्रइव तिङ्गी॥ णाम दपेतं जातो वैवचन
मिस्यर्थे विसंवादाभाव एवानत्यचोऽत्यादिरित्सुकृ एवाचस्त्यस्य षष्ठ्यंतत्वं मत्वा तच्यतस्तु केतु पंचम्यं
नत्वमेवेति। तत्तामौत्सितानापि स्यात्वात्प्रभिः पचम्यंतनयथाख्यानत्वान्मूलकृतिपुस्तनं दोषे सा ताम
नुमा अस्तु वा पंचम्यंतमचरंतितु भवानेव मपि भवदुक्तेन दोषः। तथाहि शुचारीनामंत्यस्याचो सं ११

सा १२

प्रवादिति वचनः किंन वाभिधेतं सुधादीनां सर्वथैव तुम्बस्यादाहो स्विद्दिष्टदेशेन स्यादिति। नाद्यः॥ वच
नानर्थकत्वप्रसंगेन सर्वथैव तुमप्रभावापादनस्यासंगतेः। नापि द्वितीयः। गुणोपि प्रधानवाधकल्पनापे
क्षया गुणावाधकल्पनस्यैव न्याय्यत्वेन तावतैवाकृतेभीष्टसिद्धेः। षष्ठीस्थाने योगा॥ अत्रेदं वोध्यं॥ इको
गुणा [redacted] वृद्धीरित्यमन पियोगश्च पदोपस्थापन कृत्वा प्रसृतौ द्विधा स्याग्निवृद्धीति संबंधात् षष्ठीमात्रस्थाने
शावृत्तेन युज्यते॥ स्थाने इति सप्तम्यंतं तत्रोपस्थितं स्यादित्यर्थः॥ स्थाने योगो स्या इतिच विग्रहा॥ एव
मलोपस्य॥ उद्धि॥ आद्देपरस्य॥ अनेकाल्शित्सर्वस्य॥ तस्मिन्निति निर्दिष्टे पूर्वस्य॥ तस्मादित्युत्तरस्येता पा५
वपि शक्यानेकर्तुं यदि श्रांचोनकुर्यादिति। तस्मिन्निति। अत्र पतोस्तु केचव्यवहिते व्यवहितेच प्राप्ते
व्यवहित एवेति पूर्वस्य परस्यच प्राप्तं स्वं पूर्वस्यैवेति नियमार्थमिति वार्तिकं। तस्मिन्निति परिभाषा हि विधेया
भूतानास्तामिह पद्मन्नतो विधिविशेष्य च मूर्तिकः सन्नुदाहरणेषु प्रवर्तते। प्रकृतसूत्रे कालेवा तिप्रसक्तोति
यस्यतो रहत्वाचि पत्तिकदतिव्यवहिते व्यवहितेवापूर्वस्य परस्यवा स्थानेनंतरसमीपवेत्तनेक समस्य

मन्वे· हृषि न त्वेन तस्मिन्नित्यादिपरिभाषासंबंधात्सूत्रं यन्निनिष्ठिनार्थं रूपस्य शरीरस्य निष्पत्ते रेवाभावात्सुबवि
१२ रेव दुर्घटा कृतः पुनरपि प्रसक्तिः। अन्यथापि दर्वीत्याहार्थ [illegible] तो स्थाने न्तरतमइत्यादीनाम विनि गृह
12 विधित्वापत्तेः। गृलिते शास्त्रम पी र्थ्या॥ वि शास्तेयेकोगुणोवृद्धीरूपस्य नियममरूपनामावस्तुतान्नाला
वासक्तिनिरस्यंती भवतीपयाविजिता। भाष्ये तु नियम्यतस्तु तिनियमफलमेकव्योक्तं। अत एवानीत्यपरि
भाषापि तत्र निमप्यदेन व्यवहृता। न त्वेवमन्ये तव्यवहर्तुं सीधतो। अनेकाल्। अत्र शिदनेकाल ङ्गित्व
वंस्येति यद्यपि शक्यते सूत्रं निर्मातुं। आदेः परस्य। शिदनेकाल् [illegible] न्त्यस्य। ङिच्चेति सूत्रनासो वा।
अत्र शिदनेकाविति अलोन्त्यस्येत्यत्रापन्नु वर्तते। अलोन्त्यस्य। शिदनेकाल्ङिच्च। आदेः परस्येतितु न शक्यते
अशिदनेका [illegible] लित्यस्य ङिच्चेत्यत्रासंबंधादादेः परस्येत्यस्याप्यसंबंधापत्तेरनेकालुत्यानुवृत्तिस्तु क्लिष्टा।
तथापि नानर्थे विप्रतिषेधहेतुकेनस्य दोषानवमेवं विधसूत्रं निर्मातोरुह्य पूर्वाद्स्यातात्पर्यकांतरो [illegible] एम
नडुपपादनं वेदाक्षानावत्यनानेकाल्शिदिति निषेधस्तु अनेनेतरस्य विधिर्वेति नियमादादेः परस्ये १२

न१

त्यस्यैवस्थानित्वलोपस्यैवस्थापि।स्थित्वेत्यपवादेऽवहितत्वाच्च॥ इतिपरिभाषाप्रकरणम्॥

इकोयणाचिप्रत्विकृशब्देनबद्धविर्तग्गृह्यतेयणाशब्देनसमेतिनास्तियथासंख्यमितिनान्ता।

स्थानेनान्तरतमइतिसूत्रगतस्यभाष्यग्रंथस्याकुलीभावप्रसंगात्॥ तथाचतत्रोक्तं॥ कि[illegible]मुदाहरणं

इकोयणाचिरध्यवसेयोनानुदेशेनाप्येतन्सिद्धमितिनेतिचेत्कृशब्दवाच्यसंज्ञाचतच्छब्दवाच्यानां

क्रमेणायणाशब्दवाच्यसंज्ञाचतुष्टयवाच्याभवंतीत्येवंपरिभाष्यग्रंथइतिवाच्यः।एवमपिकृतत्त्व

ज्ञेययथासंख्यपरिभाषाप्रवृत्तिनिराप्त[illegible]परसूपानास्तियथासंख्यमितिभवड्केभाष्यविरुद्धता

याश्चपरिहारा॥ मकारवाच्यस्यलृकारस्यरेफसमत्वात्प्रांतुकस्यार्धस्यइष्टत्वाच्च॥ ना[illegible]पात प्प्रा४

न[illegible]एवार्थंप्रवेपन्नातोभाष्यग्रंथइतिपुरुषवर्षो।शक्यप्रक्रियायांगतावायतानितिमहार्बिवचन

घ[illegible]त्यंतमसंगतेः॥ इतिश्चेस्सोरकृशब्दवाच्यत्वादितातिचतुष्टयाविच्छिन्नानांक्रमेणायणशब्दवाच्य

प[illegible]त्वादिजातिचतुष्टयावच्छिन्नाभाव्यन्तेइतिजातिसंख्यामादायसंख्यातानुदेशोभाष्यकृतामोभि

त्यं २ ६३

म.खं
१३
13

प्रेतः निरूढलक्षणाप्येवं सति भवदुक्ता नाङ्गीकर्तव्येत्यपरं लाघवम्। सवर्णेऽणग्रहणमपरिभाष्य
माकृतिग्रहणादित्यणुदित्सूत्रगतं वार्तिकमप्यनुगृहीतं भवतीति ग्रन्थकृता यावत्परिपुष्टा भव
ति। एवं जातिपक्षे व्यवस्था। व्यक्तिपक्षेप्यवच्छेदकसंख्यामादाय यथासंख्यप्रवृत्तिरव्याहता।
निरूढलक्षणादिकं तु न वारयामः। इत्थं स्थान्यादेशानां संख्यासाम्यं नास्तीति वदन् केयटो
पि प्रत्युक्तः। न चैत्वाद्यवच्छिन्नानां क्रमेणायत्वाद्यवच्छिन्नविधानेप्य[illegible] ननु नासिकप्रस
ङ्गः स्य वारणायान्तरतमपरिभाषैवान्ते शरणीकरणीयेति तस्या एवात्र प्रवृत्तिरुचितात्र
तएव स्थानेन्तरतम इति सूत्रे इकोयणचीत्यत्र संख्यातानुदेशो नान्यथासिद्धिमुक्तौ
प्रवृत्तितोन्तरतमनिवृत्तिं दूषयद्भिर्भाष्यकारैरिकोयणचीति यणां येन्तरतमा इत्यादिना
ग्रन्थे न पुनः स्थानेन्तरतम इत्यस्य प्रवृत्तिरुक्ता। अन्यथा यणविधौ अन्यथासिद्धिपराहती
कृतस्यास्य पुनरग्रिमग्रन्थे तत्र प्रवृत्तिरकथनीयैव स्यादिति वाच्यम्। एवमपि स्थानिगतैत्वा
दिजाति[illegible]चतुष्टयस्यादेशगयत्वादिजातिचतुष्ट[illegible]यस्यैव संख्यासाम्यमादाय परत्वादन्तर
ता

राम
१३

तमपरिभाषाबाधेनप्रवर्तमानायायथासंख्यमितिपरिभाषायाःप्रकृतेतयागतार्थत्वेपिदुष्परि
हरत्वात्।इहयथासंख्यपरिभाषायाविषयएवनास्तीत्यमुमर्थंसमर्थयितुंत्वदुपपादितस्य
संख्यासाम्यवैकल्यस्यवैयर्थ्याच्च।अनुनासिकाननुनासिकव्यवस्थायांतुयथासंख्यप
रिभाषायाव्यापारस्यविरहात्तदंशेन्तरतमपरिभाषायाःप्रवृत्तिःपरैरपिनवार्यते।स्वौजस
मौट्छष्ट्यामप्यनुनासिकाननुनासिकव्यवस्थांशेयथासंख्यपरिभाषाव्यापारविरहाद
न्तरतमपरिभाषायाःप्रवृत्तौस्थानिगतेत्वादिजातिचतुष्टयस्यादेशगतयत्वादिजातिचतु
ष्टयस्यचसाम्यमादायांशान्तरेन्तरतमपरिभाषांपरत्वाद्बाधित्वाएतस्याःपरिभाषायाःप्रवर्त
मानायाःप्रकृतेपाणिनानिरोद्धुमशक्यत्वेनत्वदुपपादिततत्परिभाषाप्रवृत्त्यभावस्यासंगते
श्चायमेवविवेकोयणावीत्यत्रयथासंख्यमितिपरिभाषायाःप्रवृत्तिमावधारणानांप्रक्रियाकौ
तांतद्व्याख्यातॄणांचाशयः॥ ॥नपदान्तद्विर्वचन॥यत्तुनवेष्ठवदित्यतिदिष्टेनणावि
भत्वेनपदत्वबाधः।णिचोलुप्तत्वात्।नचप्रत्ययलक्षणम्।वर्णाश्रयत्वादित्युक्तम्।तत्र
चिन्त्यते।किमत्रवर्णाश्रयम्।नतावदिष्ठवदित्यतिदेशः।तस्यणिज्मात्राश्रयत्वेनवर्णाश्रय
तायाविरहात्।नचभसंज्ञाशास्त्रम्।तस्यातिदेशलभ्यत्वेननिमित्तविरहेपिप्रवृत्तिविरहात्।नापि
यदंशवैकल्यप्रयुक्तःप्राप्तिविरहस्तदंशेतिदेशव्यापारोनत्वंशान्तरेपीतिवाच्यम्।एवमपिमुख्य

तयावर्णाश्रितत्वविरहेण वर्णाश्रये प्रत्ययलक्षणं नास्तीति निषेधस्य तत्राप्रवृत्तेः प्रवृत्तिस्तु
१४ 14 तस्य सुयशा इत्यादौ वाशारीत्यादौ कर्तव्या। अन्यथा अतणो ङित्यत्रे नुगागमो न स्यात्। विशेषणत
याप्यलाश्रये विधौ स्थानिवद्भावस्यानभ्युपगमात् प्रत्ययलक्षणसूत्रं तत्र सार्थकमिति वा
र्तिककारैः स्वीकारात्। अपरस्त्वाह इमं विधौ हल्ङ्याब्ग्रहणानुवृत्तिमनङ्गीकुर्वतां सुदृषदित्यादौ
सोर्मनसी इति स्वरस्यात्वसन्तस्येति दीर्घस्य च निरासाय प्रत्ययलोपे प्रत्ययलक्षणमेव भ
वति। न तु प्रत्ययाप्रत्ययसाधारणरूपपुरस्कारेण क्रियमाणं कार्यमिति नियमविधिमा
श्रयतां भाष्यकृतामेतत्सूत्रस्य विषये स्थानिवद्भावेन गतार्थं मन्यमानानां मतमाश्रित्ये
दमुच्यते वर्णाश्रयत्वादिति। मैवम्। एवमप्यवः परस्मिन्निति णिलोपस्य स्थानिवत्त्वा
त्तिविकथं नाम शक्यते [illegible] भत्वं वारयितुम्। अन्यथा पटुः कृतः पटितः लघुः कृतो ल
घित इत्यादौ टेर्वा यो ऽङ्गत्वं दुर्वारं स्यात्। त्वदुक्तरीत्या भत्वाभावेनान्तर्वर्तिविभक्त्यापदत्वा
त्। नव कर्मसाधन विधिशाब्द पङ्क्ते षडिक इ[illegible] वपटितादावपि भसंज्ञायाः पदान्तविधित्वात् १४
तस्यां कर्तव्यायां णावः स्थानिवद्भावस्य दुर्लभतया कथं भं शक्यते संपादयितुम् अतो ऽङ्गत्वनिवृ
त्त्यै समाध्यन्तरमेवास्थेयमिति वाच्यम्। भाविनोप्य[illegible] पवादस्य विषये उत्सर्गस्याप्रवृत्तेस्तत्रा
ङ्गीकृ[illegible] ततया तथैव प्रकृते पदसंज्ञायाः सुवारत्वात्। षडिके गुडकारानुरोधेन विषयभेदस्ये

वत्वाच्चत्वात् । अस्य पदद्वान्तयोर्न्नभत्वेन परमते पदत्वं वारणीयम् अपि तु टिलोपस्य स्थानिवद्भावेन
अशत्वा रूढस्य पदत्वस्य पूर्वविधित्वादपदान्तविधित्वाच्चेति चेत् । एवमेव तन्न हि यत्रापि नि
षेधनिमित्तीभूततायां वकारगतपदान्ततायामपि सवर्णत्वेन कर्मसाधनत्वविधिशब्दाश्रयणे
भवदुक्तदोषस्यासङ्गत्यापत्तेः । यदि तु सिद्धान्तेऽपि पठित इत्यादौ चेतस्वत्सान्तस्यैव दुर्ल
भभसंज्ञास्थानिवद्भावात् सुलभा च पदसंज्ञाभावसाधनपक्षे स्थानिवत्त्वनिषेधादिति
वीक्ष्यते तदा सुवचना सि जुत्पत्तिपक्षे पदे अन्तःपदान्त इति पक्षमालम्ब्य पदसंज्ञायां स्था
निवत्त्वनिषेधनिरासो विधेयः । सुद्ध्युपास्य इति । ननु त्रैपादिके अन्तरङ्गे बहिरङ्गपरिभाषा
न प्रवर्तत इत्युक्तम् । नार्कुटः नार्पत्य इत्यत्र विसर्गवारणाय वृद्धेरसिद्धत्वस्य तत्रैव भाष्य
स्पष्टत्वात् । संयोगान्तस्य लोपे यणः प्रतिषेध इत्यस्य बहिरङ्गत्वेन प्रत्याख्यातत्वात्त्वयम
पितथैवानूदितत्वाच्च । तस्मादिह यथोद्देशपक्षे ग्राह्यो बहिरङ्गपरिभाषाया अप्रवृत्त
य इत्याद्युक्तम् । तदसत् । तथा हि । सुद्ध्युपास्य इत्यत्र त्रैपादिके अन्तरङ्गे बहिरङ्गपरिभाषान
प्रवर्तत इत्युक्तवद्भिः भविष्णुरुमिनश्चेत्यत्र प्राचा निरुक्तं धुटः परादित्वस्य प्रयोजनं बहिरङ्ग
परिभाषयागतार्थत्वात् इत्युक्तमित्युक्तम् ... न तद्गुन्ययोः पूर्वोत्तरयोर्विरोधे प्रसक्ते तत्
परीहाराय सञ्छिद्येणा भवता तदाम्नायो वर्णितो न तु मुद्रितो यथोद्देशपक्षाश्रयेणैको ग्रन्थोऽ

१५ परश्च कार्यकालपक्षावलम्बनेनेति भाष्यवार्त्तिकेनैव हि भाष्यादिग्रन्थेषु विरोधाः परिह्रियन्ते
15 ऽन्यथा त्वदुक्तोऽयं दोषाभासो विसर्जनीयसूत्रगतभाष्यकैयटयोरपि निपतेत्। अतः कोऽयं
नयो यत्परग्रन्थेष्वाशयकल्पनया विरोधाः परिह्रियन्ते गुरुग्रन्थे वाशयापह्नवेन विरोध उ
द्भाव्यत इति। तस्माद्भाष्यादिग्रन्थ इव गुरुग्रन्थेऽपि परमरणीय एव। एत्येधत्यूठ्सु॥ ॥यत्तु एधत्य
तेरेधत्यपेक्षया प्रकृत्यन्तरत्वेनैधति गृहणेनाग्रहणान्माप्रेदिधदित्यत्र वृद्धेः प्राप्तिरेव नास्ती
त्येवीत्यनुवृत्तमेतेरेव विशेषणमिति धातुवृत्तिकृतां मतं प्रत्याचक्षाणोऽरुपैधयत इत्यत्रापि व्या
पन्नं नोद्भावितं तत्तदस्फूर्तिविशात्। स्वादीरेरिणोः॥ ॥यत्तु लिङ्गविशिष्टपरिभाषयोतेनिष्फलं
मा स्वैरिणीत्यत्र ङीपः प्रागुणागमादाय वृद्धिर्वेध्येति वर्णितम्। तद्गुरुग्रन्थाशयानवबोधा
त्। तथा हि। ईरस्य ज्ञानं मार्गे प्रिय इत्यादौ ईरशब्देन कृते समासे पश्चात्स्वस्य ईरज्ञानं स्वस्य ईरा प्रि
य इति विग्रहे कृते समासे स्वेरज्ञाने स्वेरा प्रिये च प्राथमिकसमासपूर्वपदीभूत ईरशब्दे परे १५
वृद्धेर्वारणायोत्तरपदयोरीरिणोः परयोर्वृद्धिरित्यवश्यं वाच्यम्। इत्थं च ङीपः प्राग्वर्तिन ई
३ नु रिणो ... त्तरपदत्वाद्वृद्धेः प्राप्तौ लिङ्गविशिष्टपरिभाषैव शरणमिति हि तेषामाशयस्तत्र किं
मुच्यते निष्फलामिति। ननु स्वादीरेरिणोरित्यत्र समासग्रहणस्याभावात् केनोत्तरपदस्याक्षेपः
स्यादिति चेत्। समासग्रहणस्याभावेऽपि वस्तुतः समास एव वृद्धेरिष्टत्वान्नान्तरीयकतया प्रा

तेनापि समासेनान्वेपस्य परेणापि वाच्यत्वात्। अन्यथा प्रागुक्तोदाहरणेष्वतिव्याप्तेर्दुर्वारत्वापत्तेः।
न च तेषु वृद्धिरिष्टेति शक्यं वदितुम्। स्वाभिन्नार्थप्रतीत्यैव तस्या इष्टेः। अथास्य पदविधित्वात्सम
र्थपरिभाषोपस्थितेर्वारणीयतया प्रागुक्तदोषनिरासः स्वशब्देनैरशब्दस्यान्वितार्थत्वाभावादि
ति चेत्। एवमपि दूरश्च घटश्चैरवटौ स्वश्चैरवटौ स्वैरवटावित्यत्रातिव्याप्तेरनिरासात्॥ ॥प्राद्
हो॥ यत्तु ऊढग्रहणेन क्तान्तमेव गृह्यते न तु क्तवत्वन्तस्यैकदेशः अर्थवद्ग्रहणादुपस्थितस्याधि
स्यापवादं प्रति विशेषणतायाम्बोधित्वात्। वृश्च्यादिसूत्रे राजेः पृथग्भ्राजिग्रहणेनार्थवद्ग्रहणेना
नर्थकस्येति परिभाषाया ज्ञापनाश्चेत्याहुः। तन्न। प्रकृतविधेः पदविधित्वेन समर्थपरिभाषोपस्थिते
रवारणीयतया प्रशब्दद्योत्यार्थान्वितार्थकेषु ऊढादिष्वेव वृद्धेः प्रवृत्तौ निर्व्यूढायामुत्तरपदान्वेपेव
सति क्तवत्वन्तैकदेशऊढशब्दे परे वृद्धेः प्रसङ्गस्यैवाभिरहेणार्थवत्परिभाषोपन्यासस्य निष्फलत्वा
त्। आवश्यकः पुनरयं समर्थपरिभाषयार्थवत्परिभाषयाव संस्कृतेप्यस्मिन्विधौ अजहत्स्वार्थ
यामुत्तरपदान्वेपः परस्याधि। अन्यथा ऊढश्च घटश्चोढघटौ प्रकृष्टावूढघटौ प्रौढघटावित्यत्रातिप्र
सङ्गान्नेः प्रस्यद्वन्द्वेन सह सामर्थ्यस्यानिष्प्रत्यूहत्वात्। ऊढशब्दस्यार्थवत्त्वाद्धानन्च जहत्स्वार्थायां
तावुत्तरपदान्वेपस्यावश्यकत्वेपि जहत्स्वार्थायामर्थवत्परिभाषयापि शक्यते तत्प्रयोजनं साधयि

१६ 16 तुमतस्तदुपन्यासोनातीवनिष्फल इति चेत्। जहत्स्वार्थायां तदुपन्यासस्य बाधपराहतत्वात्। तथा हि।
प्रौढ इत्यादिसमासोत्तरपदीभूता ऊढादयः प्रकृ[illegible]तवार्तिके परत्वेन निर्दिष्टा इति हितावन्निर्विवा
दम्। एवं च जहत्स्वार्थायां पूर्वपदस्येवोत्तरपदस्यापि गलितार्थकतया नास्त्येवार्थवत्तो ग्रहणाभि
त्यविषय एवायमर्थवत्परिभाषायाः। न च वृत्तेः पूर्वं स्थितानामूढादीनामर्थवतामादाय तस्याः प्र
रोह इति वाच्यम्। ऊढग्रहणाद्विधाया दिवृत्तिपूर्वपदीभूतानामप्यूढादीनां तथाविधाया अर्थवत्तायाः
संभवात्। तस्माज्जहत्स्वार्थायां बाधपराहता समर्थपरिभाषोपन्यासस्य त्यागतार्थवेयमर्थवत्परि
भाषा। अजहत्स्वार्थायां तु संनिहितापि प्रौढ इत्यत्रातिप्रसङ्गवारणायसमर्थेति पक्षद्वये
पि उत्तरपदान्ते पूर्ववत्सफलत्वादुपन्यासयोग्यः। अथ यदि दीक्षितकृतोर्थवत्परिभाषोपन्या
सोपि सफलीकरणीय इत्याग्रहस्तदेत्थं सफलीक्रियताम्। सत्यप्युत्तरपदान्ते ऊढ इति यदि
कस्यचिन्नामक्रियते तदा तस्मिन्नुत्तरपदे प्रौढ इत्यत्रातिप्रसङ्गवारणाय प्रसिद्ध्या प्रसिद्धिनि १६
बन्धनो गौणमुख्यन्यायोनुसरणीयः स चार्थवत्परिभाषाप्रवृत्त्यधीन इति तदुपन्यासः सफलः।
॥ ॥उपसर्गादृति धातौ॥ सूत्रेस्मिन्नुपसर्गे ऋतीति प्रतीकमादाय यथाक्रियायुक्ता इत्यादिना मनो
रमायामाशयवर्णनं कृतम्। तद्यद्यप्युपसर्गाः क्रियायोग इति सामान्यलक्षणेनापि प्रकृतार्थ

स्यसामर्थ्यस्यैव क्रियायुक्ता इति विशेषणं लक्षणोपन्यासस्यानुपयुक्तत्वादरमणीयमिवाभातितथा
पीत्थं वे व्याख्यायते तदरमणीयमेव। तथाहि। ननु धातुग्रहणाभावे धातावुपसर्गेणान्विते विप्रभूत
मुद्धोयस्मिन्ग्रामे सम्प्रधेनामहृत्यत्र वृद्धिप्रसङ्गो दुर्वारः। प्रस्योपसर्गत्वात् वृद्धस्य अकारादिधातुप्र
भवत्वाच्च। अतश्चैवंविधधातुनिवृत्तिद्वारा प्रकृतोपसर्गगतोपसर्गताप्रयोजक धातुविशेषणलाभार्थं
धातुग्रहणं भविष्यतीति कथं योगविभागार्थमुच्यत इत्यत आह। यत्क्रियायुक्ता इत्यादि। तथा चो
पसर्गसंज्ञयैवैतादृशधातुनिवारणं धातुविशेषणलाभश्च भविष्यतीति धातुग्रहणं योगविभागा
र्थमेवेति हृदयम्॥ ॥निपात एकाजनाङ्॥ यत्तु पर्युदासादेवाजूपनिपाते लब्धे निपातग्रहणमु
त्तरार्थं स्पष्टार्थमिहेत्यन्यवृत्तमितिवदन्ति। तन्न। तस्य अनाङित्यस्य पर्युदासत्वे प्रतिषिद्धार्थो यमा
१५ रम्भ इत्यो[illegible]नगर्भाष्यस्यासङ्गत्यापत्तेः। न वसोऽप्युवपवादः कथमन्यथाऽदो भवदित्यत्रातिप्र
सङ्गमाशङ्क्याप्रतिपदोक्तस्यैव ग्रहणमिति समाधानं ब्रूयादिति वाच्यम्। लाक्षणिकत्वेऽपि पाठसा
मर्थ्यात्प्रतिपदोक्ततायाः अनृते:। अत एवाहो इत्यादीनां सखण्डत्वेऽप्येकत्वबुद्धिस्तद्यवधानेऽप्याम्
आहेदेवदत्तेत्यत्राम एकान्तरमिति निघातप्रतिषेधश्च संगच्छते। अपि वा कोऽस्तु भे वारणे विधेलक्ष
णप्रतिपदोक्तपरिभाषाप्रवृत्तिं घटयतां प्रतिपदोक्तस्यैव ग्रहणमिति भाष्यग्रन्थस्यापि प्रौढिवा

७ दत्वमुक्तप्रायम्। इत्थं च प्रौढिवादस्स्वरसेन ग्रन्थान्तरस्य प्रौढिवादित्वमश्रुतपूर्वमेव। अथ प्रसज्यप्र
17 तिषेधाश्रयणस्य वाक्यभेदासमर्थसमासाश्रयरूपदोषदूषितत्वात्प्रौढिवादतां ब्रूम इति चेत्। अन
ञ्युशित्यकितीत्यादौ प्रसज्यप्रतिषेधाश्रयणस्यैव सर्वसंमतत्वात्। कार्यार्थं तदिति चेत्। इहापि तस्य
कार्यार्थत्वात्। तथाहि। आ आ तं अ अ इव एत इत्यत्र अशब्दस्य स्वाभाविकमाङ्भिन्नत्वं स्थानिवद्भा
वकृतं निपातत्वं चाश्रित्य प्राप्तायाः प्रगृह्यसंज्ञायाः प्रसज्यप्रतिषेधाश्रयणं विनादुर्वारत्वात्। न चैवम
शब्दस्य स्थानिवद्भावेन सत्याङ्त्वे आङ्भिन्नत्वव्यपदेशनिवृत्तिरुचितेति वाच्यम्। गुरुवद्गुरुपुत्रे वर्ति
तव्यमित्यतिदेशेन गुरुत्वस्येवाङ्वद्भावेनाङ्त्वस्यानतिदेशात्। अतिदेशो वाङ्यमकार इत्याहार्यबु
द्धेराङ्भिन्नोयमिति बुद्ध्या विरोधित्वात्। अत एव तद्वदतिदेशेऽकिद्विधिप्रसङ्ग इति [illegible]गाङ्कुटादिसूत्र
गतं भाष्यं संगच्छते। अन्यथा किंत्वे सति किद्भिन्नत्वप्रयुक्तस्य विधेरापादनमसङ्गतं स्यात्। शालादिष्वे
पि विभिनिबन्धनकित्वापादनं तु त[illegible]पि प्रसज्यनिषेधाश्रये सोऽव परिहरणीयम्। अस्तु वैकादेशेपि स्था
निवद्भावेनैव परवर्णगताङ्भिन्नत्वस्याश्रयणं कैयटकोस्तुभयोरपि परादिवद्भावेनैकादेशस्याङ् १७
भिन्नत्व[illegible]श्रयणात्। अतश्च शास्त्रीयकार्यातिदेशो लौकिकस्याङ्भिन्नत्वेऽस्य कथमतिदेश इति नाश
ङ्कनीयम्। न धातुलोप इति सूत्रे लोलुव इत्य[illegible]त्रो वङः स्थानिवद्भावकृतस्य यङः कार्यायेन्रूयापूर्वत्व

स्यनवीनैराश्रयणात्। अचः परस्मिन्नितिसूत्रेस्यवीयानित्यत्रगुणास्यस्थानिवद्भावादनादिष्टादचः
पूर्वत्वस्यकैयटेनाभिधानाच्च। विशेषणाद्वारकंशास्त्रीयत्वंतुप्रकृतेपितुल्यम्। नचपर्युदासाश्रयणे
नैवनिपातत्वेलब्धेपुनर्निपातग्रहणंनिपातएवयोनिपातइत्यर्थलाभार्थम्। तेनस्थानिवद्भावालब्धं
स्वाभाविकंनिपातत्वमनुभवतएवानेनसंज्ञाविधीयतइतिनैतदित्यत्राकारस्यप्रगृह्यसंज्ञाप्रसङ्गइ
तिवाच्यं। स्पष्टार्थमिहैवकृतमितिप्रकृतेग्रन्थस्यासंबद्धतापत्तेः। आनूऋस्यकृजतीत्यत्रसवर्ण
दीर्घस्यप्रगृह्यतानापत्तेश्च। ओत्सूत्रगतभाष्यकैयट कौस्तुभविरोधाच्च। इत्थंचोत्सूत्रगतःकौस्तु
भग्रन्थःसर्वेप्यसंगतइतिध्येयम्। अधिकंकौस्तुभखण्डनादवसेयम्॥ ॥ईदूतौचसप्तम्यर्थे॥ य
त्वस्यसूत्रस्यसप्तम्यन्तवातप्रमीशब्दादिरप्युदाहरणमितिकौस्तुभेनोदितम्। तन्न। सप्तम्यन्त
वातप्रम्यादिशब्दानांप्रयोगस्यैवदुर्लभत्वात्। नचशब्दानांलक्षणानुसारिणांकथंप्रयोगदुर्ल
भतेतिवाच्यम्। सतिहिप्रयोगेइदूदूपसप्तम्यभावप्रतिपादकस्यतत्रापिसरसीयदीतिवार्तिकग्र
न्थस्यविरुद्धत्वापत्तेः। नवास्तिईदूतौसप्तमीतिभाष्यग्रन्थस्यविरुद्धत्वापत्तेश्च। नचवचनस्यनि
रवकाशताप्रयुक्तेसामर्थ्यमात्रेभाष्यवार्तिककृतोस्तात्पर्येनत्वीदूपसप्तम्याअभावे निरवकाशता
तुवचनस्येदंशेगलितापूर्वदंशेनिर्वाधासतीतिविवक्षितार्थसिद्धयेस्यादेवेतिवाच्यम्। एवमपीदंश
निरवकाशतांस्फुटंप्रतिपादयतोमुनित्रयवचनैरसुद्धापत्तेरनुग्रहात्। नाप्यूदंशनिरवकाशता

१८ प्रतिपादनपरत्वं ग्रन्थस्यास्य ज्ञात्वापि संभवति ईकाररूपसप्तमीपरस्सरः शब्दो द्रावनस्य ङीषन्तसरसी
शब्दव्यवस्थापनस्यवासङ्गत्यापत्तेः। न च तद्ग्रन्थस्यार्थवत्त्वादत्रत्त्वार्थे तात्पर्यमपि तु यथा क [illegible] र्थे वि
18 न्निरवकाशत्वं [illegible] इति शङ्क्यम्। संस्थानत्वं नमः स्व्यात्र इत्यस्यापि न स्वार्थे तात्पर्यमपि तु स्वशास्त्रकर
णावश्यकत्वे इत्यस्यापि स्तुवत्त्वेन स्व्या धातोरार्धधातुकविषया साधुत्वस्य त्वदुदीरितस्यासिद्धिप्र
सङ्गात्। न च भवन्मतेपीदं शा निरवकाशताकथनस्य नैरर्थक्यम्। प्रागुक्तदिशा ऊदं शा निरवका
शतोन्नत्यापि परस्येष्टसिद्धेरि [illegible] तिवाच्यम्। यदंशे वचनस्य निरवकाशत्वं तदंश एवमुख्यार्थत्याग
पूर्वको गौणार्थपरिग्रहः संज्ञाविधिप्रत्ययतदन्तग्रहणनिषेधस्य वाधो वा नाशान्तर इति यदि क
श्चिद्रूपान्तरं प्रतीदं शा निरवकाशे तात्पर्यमस्तीति प्रदर्शनं रमणीयमेव। अन्यथा को ह्येवं संनिहितं
निशितं नखुरमुपेन्द्रयशाङ्कुलयामारणावकं मृगराउयन्नुपहसनीयः स्यात्। कश्च वातप्रैवारिरायुप
स्पर्शमुपलभमानः परं प्रतिधूमेनाग्निं [illegible] ताधयेत्। संस्थानत्वं नमः स्व्या इति वचनरूपाद्धि ङ्क्ला [illegible]
[illegible] दार्धधातुकविषये स्व्या वा तोरिव वातप्रम्यादेरपि सप्तम्यां प्रयोगो निष्प्रत्येत्यस्मादेव भाष्यवा १८
र्तिकक्षतोर्वविनादवसीयते। कथमन्यथा इयूङुवेति कल्पनारूपाद्धि ङ्क्लात्यैरे [illegible] यठीधीप्रसिद्धमूर्ध
न्यानुवृत्तिरूपाद्धि ङ्क्लास्त्रियाष्टन् शब्दस्य वभविषयेऽकृतष्टुत्वस्य भवता वा साधुत्वमुक्तं संगच्छ
तां तदित्यं सप्तम्यन्तवातप्रम्यादिशब्दानां प्रयोगदौर्लभ्यं निरूपितम्। एवमपि यदि तेषां प्रयोगयोग्यत्व

पिपित्र

मस्तीतिदुराग्रहस्तथाप्येतत्सूत्रोदाहरणत्वं वक्तुं युक्तम्। सूत्रान्तरैरनुपसंग्रहात्। तथाहि। शिष्टः शब्दो
लुप्तस्यार्थमभिधत्ते यथा व्यातिसेहन्नित्यत्र प्रकृतिप्रत्यययोरिति तु सकलसंमतम्। प्रकृतसूत्रे
च सप्तम्यान्द्विष्टा प्रकृतिरीदूद्भ्यां विशेष्यते। तेन सप्तम्यर्थे वर्तमाना ईदूदन्ता या प्रकृतिरित्युद्दे
श्यदलार्थः संपद्यते। तत्र सप्तम्यर्थे वर्तमानेत्यनेन सप्तम्या लोपो गम्यते। न ह्यलुप्ते प्रत्यये प्रत्ययार्था
र्थे वर्तमान एव प्रकृतिर्भवति। इत्थं च सप्तम्या लुकि सति या तस्याः प्रकृतिरीदूदन्ता सा प्रगृ
ह्यसंज्ञा भवतीति निष्कृष्टो वाक्यार्थः सप्तम्यर्थ इत्यस्य स्थाने सप्तमीलुकीति तु नोक्तमर्थमा
त्रालोभात्। शिष्टो लुप्तार्थाभिधायीत्यर्थस्य शिष्टेष्वनुकरणाया वोधनीयत्वाच्च। एवं चैवं वि
धार्थकस्य प्रकृतसूत्रस्य भवदुक्तमुदाहरणं कथं नाम संगच्छताम्। स्वरूपं वाथो भाष्यादिस
कलग्रन्थकारसंमत एव तदुपदर्शितसकलार्थानुगुणत्वात्। किंच। भाष्यवृत्त्यादिषु सर्वेषु प्रा
माणिकग्रन्थेष्वेतत्सूत्रोदाहरणानां लुप्तसप्तमीकानामेव प्रदर्शितत्वाद्धातप्रम्यादीनामनुदा
हरणत्वेवेतिरमणीयः पन्थाः। न हि शास्त्रकृता तादृशोदाहरणस्फूर्तिः शक्या संभावयितुम्॥
एतेन छन्दोनुवृत्त्यभावा...न्नास्य छन्दोमात्रविषयत्वमिति कोस्तुभोक्तमश्रद्धेयमेव। छन्दोनुवृ

१५ त्वभावेऽपि सूत्रार्थस्य लौकिकोदाहरणे [illegible]ष्ठ योगेन छन्दोमात्रविषयतायाः पर्यवसानात्॥ ॥ सं
17 बुद्धौ शाकल्यस्येतावनार्षे॥ यत्तु ओदित्यत्र निपातानुवृत्तेरिह संबुद्धिग्रहणस्य वस्त्वादोगवि
त्यय मन्ताहेति प्रत्युदाहरणमुक्तमयुक्तम्। तत्र प्रगृह्यसंज्ञासत्त्वेऽपि प्रकृतिभावस्य पदान्ताधि
कारान्तर्गतस्याप्रवृत्तेः न्द्रुतिविरहादित्याहुः। तन्न। अपदान्तग्रहणाभिकोऽसवर्णा इत्यत्रैवमराद्
कल्लुत्यानुवर्ततेन तु प्लुतप्रगृह्या इत्यत्र प्रयोजनाभावादिति वृत्तिकारेणामाशयात्॥ ॥ उ
ञः ऊँ॥ अत्र ऊँ इत्यस्मिन्परे परोऽनुनासिक इति विकल्पः सिध्यत्यन्यथा तु मरीयमियम्वेत्येवावन्स्वा
दितिमनोरमाग्रन्थे यद्यपि यथासंख्यप्रवृत्तिदोषः संभवति तथाप्यान्महतः सन्महदित्यादिनि
र्देशैर्लिङ्गैर्नात्र यथासंख्यपरिभाषा प्रवर्तत इति शक्यते परिहर्तुमतो नोपन्यस्तः। दोषान्तरं
तु स्यादेव॥ ॥इत्यच्सन्धिः॥ स्तोः श्चुना श्चुः॥ ॥ यत्तु स्तोरिति समाहारद्वन्द्वः सौत्रं पुंस्त्वमित्युक्त
म्। तद्सत्। णत्यन्तरस्य संभवे सौत्रपुंस्त्वस्यागतिकगतेरेवाश्रयणीयत्वात्॥ ॥ ष्टुना ष्टुः॥ यत्तु स्तोः १५
श्चोः श्चुष्टोः ष्टुरिति सुवचम्। न वत्तस्मिन्निति परिभाषोपस्थानं यावत्राईदेई ष इत्यादिना सिध्येत्। शा
त्। नपदान्ताट्टोरिति लिङ्गेन तस्या इहानुपस्थानस्याभ्युपगमादित्याहुः। तन्न। न पदान्ताट्टोरिति

अयोगादौ चेत्यादौ ष्टुत्वानापत्तेः। न च लिङ्गसामा १

न्यनिषेधरूपलिङ्गस्य टवर्गशिरोतस्मिन्निति परिभाषाबाधेनाप्युपपत्तौ षकारांशे बाधकत्वानौचित्य
तः प्रकृतसूत्रविषयत्वा[illegible]वच्छेदेन तादृशपरिभाषाप्रवृत्तिविरहबोधकत्वमिति वाच्यम्। परि
भाषायाः सर्वथैवेहाप्रवृत्तौ तत्प्रापितस्य परत्वस्यैवाव्यवहितत्वस्याप्यनुपस्थितेर्मनु[illegible]री
काकुत्तैलमित्यादौ ष्टुत्वप्रसङ्गात्। न चेहाव्यवहितत्वस्य प्रापकं योगान्तरमस्ति। अथ यदं
शे बाधं विना लिङ्गमनुपपन्नं तदंशे बाध एव लिङ्गेन सिध्यति ननु सर्वात्मना सूत्रप्रवृ
त्तिबाध इति परत्वांशे एवेह बाध्यते। नाव्यवधानांश इति चेत्तर्हि टवर्गशकारपरत्वांशे एव बा
ध्यतां न तु षकारादिपरत्वांशे इति दूषित इत्यादौ ष्टुत्वाप्रसङ्गः॥ ॥शितुक्॥ यत्तु इदं प्रयोजनं
बहिरङ्गपरिभाषया गतार्थत्वात्प्रत्याख्येयमिति गुरुग्रन्थमनूद्य तत्पाञ्चिकं त्रिपादीस्थे नान्तरङ्गे
[illegible] परिभाषेयं न प्रवर्तत इति सुध्युपास्य इत्युदाहरणमस्त्वोन्नत्यासहविरुद्धं चेत्याहुः। तद्गुरू
णामाशयस्यानवबोधात्। तथा हि। कार्यकालतायां बहिरङ्गपरिभाषाया धुटोऽसिद्धत्वेन
णत्वनिषेधस्यानिष्पत्तेः हतया यथोद्देशतायां णत्वनिषेधो धुटः परादित्वे प्रयोजनमिति हि

व२

१० प्राचीनैर्वाच्यं तथा चैतत्प्रयोजनं पाणिनिकं न तु सार्वत्रिकमिति तेषामाकूतम्। इत्थं च प्राचीनैरुक्ते
20 प्रयोजने पाणिनिकतारूपस्य दोषस्य गुरुमिरमिहि तस्याः पाणिनिकत्वात्पाणिनिकमित्यभिधान
मसदेव। सुध्युपास्य इत्यत्र त्रिपादीस्थेन्तरङ्गे परिभाषेयं न प्रवर्तत इति तेषामुक्तिस्तु यथोद्दे
शपक्षावलम्बिनी॥ इह त्यागतार्थता न्निति पुनः कार्यकालपक्षाश्रयेति विरोधोद्भावनमप्यसं
गतमेव। हा हन्त महानयं द्रोहस्वादेकीयदुदासीनानां प्राचां ग्रन्थ आशयविशेषकल्पनेन स
मर्थ्यते न तु समर्थ्यते [illegible] च गुरूणामिति॥ ॥ ङमो ह्रस्वादचि॥ यत्तु ङम् प्रत्याहारः संज्ञायां वक्ष्य
ते स्त्रित्वं सामर्थ्यात्संज्ञिभिः संबध्यत इत्याहुः। तदसारम्। संज्ञायां स्त्रित्वस्याप्रसक्तेः। न ह्यत्र ङम्
शब्देन संज्ञाया ग्रहणस्य प्रसक्तिरस्ति। अशब्दसंज्ञेति निषेधात्। ङमु ङ इति हि समासोयम्।
ङमः परश्च ङुः यस्मिन्नसौ यं [illegible] मुदायो ङमुट् ङुट् णुट् नुट् इत्यस समुदायः समासार्थः। यद्वा ङमः
परः उट् ङमुट् स च ङुङा [illegible] ज्ञेयरूपः शब्दोर्थत्वात्प्रकृते विधीयते न तु ङमुट् शब्दः अर्थवाचेन
ङम्शब्दस्य निवृत्तेः। अन्यथा पूर्वैतु ताभ्यामेजितयन्नैकारवकारात्मकस्य समुदायस्य भाव्यत्वा २०

पत्तेः। इत्थं च उ॰उ आदिसमुदायस्याविधेयस्यैव टित्वं न तु उ॰म्शब्दस्ये[illegible]ति किमुच्यते संज्ञायां वक्तृ तं टि
त्वमिति किं[illegible]वोच्यते सामर्थ्यादिति चेत्। किं वा संज्ञा च उ॰म्शब्द आदिरन्त्येनेत्यनेन शास्त्रेण तस्यै
व संज्ञात्वेन बोधनात् न तु उ॰मुट् शब्दस्य स्वसंज्ञात्वेनाप्रसिद्धेः। टित्वं पुनरित्संज्ञक टकारावयव
कत्वं उ॰मुडिति समुदायस्य सति विधेयत्वे संभवति न उ॰म्शब्दरूपायाः संज्ञाया नापि उ॰ण नानां संज्ञिना
उ॰सूत्र मतो ग्रन्थोऽपि कौस्तुभमनोरमयोर्निरर्थकलन्हराणासापेन्क्ष्यारव्य एव। यदप्युच्यते सुगस्मी राइति
णपह्नोयो न स्थानिवत्। पूर्वत्रासिद्धे तन्निषेधादिति। तदप्यहृद्यम्। उ॰मुटः परविधित्वेन स्थानिवद्भा
वस्यैवाप्राप्तेः शङ्काया एवानुत्थानात्। न च पूर्वस्मादपि विधौ स्थानिवद्भाव इति पक्षाश्रयेण
शङ्कोत्थानं वाच्यम्। तस्य पक्षस्य भवतैवानिष्टायां सेटीत्यत्र सेऊहरणाद्विङ्क्त्वो विकृतायाः
स्वीकारेण बहुलग्रहणादीनामिवानिष्टार्थं प्रवृत्तेः। अन्यथा क्वापि तत्त्व स्वीकारे निष्फल एव
स्यात्। हल्ङ्याब्भ्य इत्यादिलोपसंपादनाय भवतापि अत्र क्वाविकृतताया एव शरणीकरणीयत्वाच्च। तस्य पूर्व
त्रासिद्धत्वाभावा[illegible]त्। न च हल्ङ्यादिलोपाभावेऽपि सुगणित्यत्र संयोगान्तलोपेन निर्वाह इति वा
च्यम्। एवमपि विगर्ध्येत्यत्र ल्यपि लघुपूर्वादित्ययादेशस्याल्लोपस्थानिवद्भावेनाप्रवृत्तौ तस्या एवा
श्रय[illegible]णीयत्वात्। यच्च बहिरङ्गपरिभाषया गतार्थत्वादुभयमसंगतमिति गुरुग्रन्थे पाण्डित्यकत्वं दूषण

२१ ४

मुपन्यस्तं तत्तेषामाशयस्यानवबोधादित्युक्तमेव॥ ॥शर्परि विसर्जनीयः॥ यत्तु यदि तु शर्परि नेत्येवोच्ये
त तर्हि प्रकृते सत्त्वे निषिद्धे पि कुप्वोः ꣲकꣲपौ स्याताम्। वासः क्षौमम् अद्भिः प्सातमिति। विसर्जनीय
वचनात्तु विकारमात्रं बाध्यत इत्याहुः॥ तत्र विचार्यते। कुप्वोरिति योगे चकारे शर्परि इत्यत्र प्रक्रान्तो
विसर्जनीयः समुच्चीयते पक्षे प्राप्तसत्त्वबाधद्वारा विसर्जनीयश्रुत्यर्थम्। शर्परि नेति कृते तु विसर्जनीय
स्याप्रस्तुतत्वात् सन्निवृत्तेश्चादेशविधानपक्षे प्यपवादासिद्धत्वेनानुवाघतया आदेशाभ्यां सह स
मुच्चेयतायाश्च अनुपपत्तेः॥ निषेधविधानसामर्थ्यात्तस्यादेशाभावपक्षे स्वातन्त्र्यावगतिरिति चेत्तर्हि तत
सामर्थ्यादेव पक्षे सत्त्वमपि भवतीत्यर्थो प्यवगन्तुं शक्यत इति क्लिष्ट एवायं पन्थाः। तत्रैव विसर्जनीयग्र
हणे तु विशेषाभावात् पूर्वपक्षोत्थानमेव न संगच्छते। इत्थं पुनः पूर्वपक्षोत्थानं वक्तव्यम्। कुप्वोरिति
योगो विभज्यते। तत्र शर्परि इत्यतो नेति विसर्जनीयस्य स इति चानुवर्तते। तथा च कुप्वोः परयोर्विसर्ज
नीयस्य सो नेति प्रथमयोगस्यार्थः। ततश्च विसर्जनीयस्य कुप्वोः परयोः ꣲकꣲपौ भवत इति द्वितीय
योगस्य। इह च प्रथमयोगविहितनिषेधस्य नान्तरीयकत्वाभावबोधकचकारस्य च सामर्थ्यात् ꣲक २१
ꣲपयोर्विसर्जनीयश्रुत्या सह विकल्पः पर्यवस्यति। नित्यत्वे हि तयोरपवादत्वादेवोत्सर्गस्य निवृत्तौ
सिद्धायां सत्त्वनिषेधस्य व[illegible]नैरर्थक्यापत्तेः। समाधानं तु तर्हीत्यादि मनोरमायामेव। इदं पुनरि

शान्यदवसेयम्। विसर्जनीयस्यसोऽशर्परि। वाशरि कुप्वोः ≍क≍पौ विसर्जनीय इतिसूत्रवि
न्यासो विधेयः। कुप्वोरित्यत्र वाशर्परइत्यनुवर्तनीयम्। इत्थं च माज्ञाभावि वंवाक्य भाव
वंसकलेष्टसिद्धिश्च भवति। न च वाशरी त्यत्राप्यशर्परि इत्यनुव[illegible]त्तिः स्यादिति
वाच्यम्। सत्याम प्यनुवृत्तौ दोषस्यलस्य दौर्लभ्यात्। अस्तु वा मराट्क च्छुत्या कुप्वोरित्यत्रै
वतदनुवृत्तिः ननु सकारज विसर्जनीय के चेत तत्सूत्रीदारशे घुवासः न्क्रोममित्यादिषु
सत्वविसर्गयोरसिद्धत्वाज्झल्परसंयोगादिलोपो दुर्वारिः। न च शर्परइत्यस्य निरवका
शत्वम्। रुशब्दा प्रकृतिकविसर्गेषु प्रातः न्क्रीरं पुनः प्रातमित्यादिषु वहुसावकाशत्वात्
नापि संयोगादिलोपे संग्रहणात्तलोप इतिवाच्यम्। भाष्यकारैः संग्रहणस्य प्रत्याख्यातत्वे
नतन्मते समाधानस्यापेक्षि[illegible]तत्वादिति वेत्सु बुद्धिभिः समाधानस्य सुप्रापत्वात्॥ ॥ अर्थवत
यत्तु अधातुरिति किम्। अहन्। लोपो मा भूत्। न च कार्यकालपक्षे प्रत्ययान्तत्वेन पर्युदासो
स्त्विति वाच्यम्। प्रत्ययलक्षणात्वेनोक्तपर्युदासाप्रवृत्तेर्नङिसंबुद्ध्योरिति निषेधे न ज्ञापितत्वा पु५

इति स्वादिसन्धिः॥३

२२ तः। कथमन्यथा राजेत्यादौ नलोपः स्यादित्याहुः। तन्न। कार्यकालपक्ष इति विशेषणानि
रर्थकम्। व्यावर्त्याभावात्। न च यथोद्देशपक्षे प्रत्ययोत्पत्तेः प्रागेव हन्शब्दस्य प्रातिपदिक
२२ नस्व-ग संज्ञा प्रवर्तमाना न शक्यते औत्तरकालिकेन प्रत्ययान्तपर्युदासेन निवर्तयितुमतस्तेना
हन्नित्यत्र प्रातिपदिकसंज्ञां निवर्तयतः कार्यकालपक्ष एवाश्रयणे न यथोद्देश
पक्ष इति स एव व्यावर्त्य इति वाच्यम्। यथोद्देशतायामपि प्रत्ययोत्पत्तेः प्राग प्रत्यया
न्तत्वरूपस्य विनाशोन्मुखतया प्रातिपदिकसंज्ञाया अप्रवृत्तेः। अकृतव्यूहपरिभाषावि
रोधात्। न चैवं प्रातिपदिकसंज्ञाया निरवकाशत्वेन स्यात् सर्वत्र प्रत्ययस्यासन्नोत्पत्तिकत्वा
दिति वाच्यम्। तत्त्वामपि प्रत्ययस्योत्पत्तौ तस्याः सति लोपे तत्सहितस्यैव समुदायस्य प्रत्यया
न्ततया केवलप्रकृतिभागस्याप्रत्ययान्ततायाश्च विनाशोन्मुखत्वात् प्रातिपदिकसंज्ञाया
निर्विषयात्। प्रत्ययस्य लोपे तु सति प्रकृतिभागस्यापि प्रत्ययलक्षणेन प्रत्ययान्ततायामेव नि २२
वर्तको न यथोद्देशतायाम्। तस्यां हि सा प्रत्ययोत्पत्तेः प्राग्भाविनरङ्गत्वात् प्रवृत्ता न शक्यते व

हिरङ्गाणिषेधेन निवर्तयितुमतः सएव पन्थो व्यावर्त्यः। नहि प्रत्यय[illegible] प्रतिषेधाश्रये प्रत्ययो
त्पत्तेः प्राक् प्रवर्तमाना प्रातिपदिकसंज्ञा कृतंव्रूहपरिभाषया शक्या निवर्तयितुम्। अप्रत्य
यान्तत्वस्य संज्ञायामनिमित्त[illegible]तया तस्य विनाशेऽनुवृत्त्वेपि न कृतिविरहात्। अत एवार्थवत्
सूत्रे सुलोपे च प्रत्ययलक्षणात्वादिति वार्तिकोदाहरणं राजेति प्रतीकमादाय तत्राप्यन्तरङ्गत्वा
त्पूर्वमिव प्रवृत्ता प्रातिपदिकसंज्ञा वहिरङ्गणिषेधेन न शक्यते निवर्तयितुमिति कैयटेनोक्त
मिति चेत्। उपजनिष्यमाणनिमित्तकोऽप्यपवाद उपसंजाते निमित्ते तकमप्युत्सर्गं बाधत इति न्या
येन यथोद्देशतायामपि संज्ञायानिषेधस्य संभवात्। न च निरवकाशापवाद विषया सोव
चोयुक्तिरिति वाच्यम्। नधातुलोपसूत्रगतेन तत्पुरुषपञ्चमे घृतइत्यत्र सर्वथैव निषेधशा
स्त्रप्रवृत्तिः स्यादिति निरुक्तन्यायमाश्रित्य प्रतिपादयता कैयटेनास्तु भाष्यग्रन्थेन सह विरोधापत्तेः
किंवा। तत्र त्यकोस्तु भोक्तरीत्यैवाज्ञाप्यकृतंव्रूहपरिभाषया कृतमपि वेति परिभाषयाऽवा वि
शिष्टास्त्राप्रवृत्तिः प्रवृत्तत्वास्त्रनिवृत्तिर्वा सुकरा। इमं चार्थं भाष्यकारा अपि स्वयन्ति स्म।

या१५ पि२

कथमन्यथा कैयटेनोक्तोन्तरङ्गत्वादित्यादौ पाणिनिप्राप्त्येव परिहारेस [illegible] त्यपि न ङि संबुद्ध्योरि
तिज्ञापकानुसरणं तत्रतत्र भवन्तोपि विदधीरन्। इत्थंच प्राचुनां कैयटग्रन्थो शिथिल एव। न
चातुल्लोपसूत्रगततद्ग्रन्थविरोधात्। एतेन कार्यकालपक्षे इति न ङिसंबुद्ध्योरिति ज्ञापन विष
यं कार्यकालपक्षतायामेव न ङि संबुद्ध्योरित्यस्य वैयर्थ्यात् यथोद्देशतायां तु प्रत्ययोत्पत्ति
१३ 23 पूर्वकालप्रवृत्ते [illegible] व प्रातिपदिकसंज्ञाया निषेधस्य चरितार्थत्वाज्ज्ञापकत्वानुपपत्तेरिति प्रत्यु
॥ क्तम्। यथोद्देशतायामपि संज्ञायां प्रवृत्तेरुपपादितत्वात् पक्षद्वयेपि ज्ञापकतायास्सूक्तते:।
एतेन राजेत्यादिसिद्धये न ङि संबुद्ध्योरिति ज्ञापकानुसरणं भाष्यमतमपि पक्षद्वये रमणीय
म्॥ ॥सरूपाणाम्॥ यत्तु एवं सूत्रादनुवृत्तस्य द्वन्द्वे इत्यस्य द्वन्द्वे प्रसक्ते सतीति व्याख्यान
मपहाय कृत इति व्याख्याने सर्वे सर्वेषामित्यादौ द्वन्द्वे च विभाषा जसीत्यनयोरापत्तेरित्याहुः १३
तन्न। द्वन्द्वे कृते सत्येकशेष इति पक्षे जसः शीभावस्य द्वन्द्वाव्यभिचारिजसः शीत्यत्रैव चवेति
वक्तव्ये विभाषा जसीति पृथग्योगकरणमनर्थकं सदेकशेषे समासकार्यं न प्रवर्तत इत्यस्या

१ ति त्वा२

प्यापादनमायातरमणीयम्। हलि सर्वेषामिति निर्देशाद्विज्ञादेकशेषविषये द्वन्द्वे वेति निषेधस्या
प्रवृत्तेऽपि नाद्य। आदेशप्रत्यययोः॥ ॥अत्रवदन्ति। एका पि षष्ठी विषयभेदाद्भिद्यते। तेनादेशः
प्रत्यययावयवश्च यः सकार इ[illegible]। यदि त्वादेशावयवोऽस्त्येत तर्हि तिसृणामित्यादौ दोषः स्या
दिति। स्यादेतत्। त्रिचतुरोः स्त्रियामित्यत्र प्रक्रियालाघवाय वृत्पृथमेष वत्यादेशे विधातव्ये सव
तस्तस्य विधानमनर्थकं स्यादतस्तत्सामर्थ्यान्न षत्वं स्यादेवं च षष्ठीवैरूप्यकल्पनं निष्फलमे
वेति। तत्रेत्थं वक्तव्यम्। तिसृश्चाचन्द्रतारास्तीति त्यत्र षत्वस्यासिद्धत्वा[illegible] रुत्वस्य प्रवर्तनेन सकारस्य
कृतार्थतास्तु। न च रिलोपस्य स्थानिवद्भावेन तिसृादेशो दुर्लभो विभक्तिपरत्वाभावादिति
वाच्यम्। कौलुत्तं न स्थानिवदिति तन्निषेधात्। न चास्य काचित्कत्वेनाचाप्रवृत्तिः शक्या वक्तुम्
प्रवृत्तिस्यलानां मुनिभिरपरिगणितत्वात्। न चैवमपि तिसृादेशादन्तर[illegible]तया प्रथमं टि
लोपस्य [illegible]प्रवृत्तौ तस्य स्थानिवद्भावात्यादेशो दुर्लभ इति वाच्यम्। टेरपि [illegible]शब्दावय
